IJCRT.ORG ISSN : 2320-2882
INTERNATIONAL JOURNAL OF CREATIVE RESEARCH THOUGHTS (IJCRT)
An International Open Access, Peer-reviewed, Refereed Journal

# वाल्मीकिविरचित रामायणे सोमयागस्य प्रस्तावना

**DSV Jagannatha Sharma**
Assistant Professor
Kalpa Department
S.V. Vedic University
Tirupati

**उपोद्घातः**

**श्रीमद्रामायणाविर्भावः**

वेदेभ्यः अनन्तरं लौकिकवाङ्मये श्रीमद्रामायणमेव आद्यम्। रामायणञ्च ब्रह्मणा सङ्कलेनेनैव लोके आविर्भूतम्। वाल्मीकिः भृगुवंशसंभवः ऋषिः इति श्रीमद्भागवते स्पष्टम्। किरातः रामनाम जपन् महर्षित्वं प्राप्य वल्मीकसम्भवात् वाल्मीकिः अभूदिति कथा यद्यपि पद्मपुराणे प्रोक्ता इति दृश्यते। सैव कथा लोके प्रसिद्धा च तथापि पद्मपुराणकथायाः प्रक्षिप्तमपि सम्भाव्यम्। अन्यत्र पुराणेषु एवं विधा कथा न दृश्यते। गोविन्दराजीयव्याख्यायामपि वाल्मीकिः भार्गवः इत्येव वर्णितः। तत्र बहुभ्यः पुराणेभ्यः दर्शितानि। वाल्मीकेः शिष्यः भरद्वाजः। सोऽपि चित्रकूटप्रान्तवासि रामेण प्रथमं दृष्टः मुनिरेव स्यात्। कदाचित् महर्षेः लोके कोऽवा सर्वगुणोत्तमः इति जिज्ञासाऽभूत्। तदानीमेव देवर्षिनारदः वाल्मीकिं द्रष्टुम् आगतः। नारदमेव स्वजिज्ञासितं पप्रच्छ। सर्वगुणसम्पन्नः कोऽवा अद्य लोके वर्तते इति पृष्टे सति नारदोऽपि "इक्ष्वाकुवंशप्रभवः रामो नाम जनैः श्रुतः" स एव सर्वगुणलक्षणसम्पन्नः वर्तते इति उक्त्वा जगाम।

नारदोक्तां रामकथां चिन्तयन् भरद्वाजानुगतः स्नानार्थं तमसां जगाम। स्नानार्थम् अकर्दमे तीर्थे अवतरितुं कृतयत्नः महर्षिभिः इतस्ततः चरन् क्रौञ्चद्वन्द्वमेकं दृष्टवान्। तदानीमेकः निषादः पुमां पक्षिणं जघान। क्रौञ्ची शोकार्ता बहुधा रुरोद। तदनीमेव वाल्मीकेः मुखात् अप्रयत्नसिद्धा वाणी एवं निसृता।

**मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।**
**यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्।।**

आम्नायादमन्यत्र च्छन्दसाम् अवतारः इति विस्मयमानः वाल्मीकिः शिष्यं भरद्वाजम् एवम् उक्तवान्।

**पादबद्धोऽक्षरसमस्तन्त्रीलयसमन्वितः।**
**शोकार्तस्य प्रवृत्तो मे श्लोको भवतु नान्यथा।।**

एवं चिन्तयन् स्वाश्रमम् आगतवान्। तदैव ब्रह्मा वाल्मीकेः पुरः आविर्बभूव। हे महर्षे! कविः असि, रामायणं त्वया रचनीयम् इत्युक्त्वा समग्रां रामावतारकथां वाल्मीकिं जगाद। पुनश्च परोक्षमपि त्वया ज्ञातं भविष्यति। अमृतं न पुत्रापि त्वयोक्तं भविष्यतीत्यपि अनुजग्राह।

**रामस्य चरितं कृत्स्नं कुरु त्वमृषिसत्तम।**
**धर्मात्मनो भगवतो लोके रामस्य धीमतः।।**
**वृत्तं कथय धीरस्य यथात्ते नारदाच्छ्रुतम्।**
**रहस्यं च प्रकाशं च यद्वृत्तं तस्य धीमतः।।**
**रामस्य सह सौमित्रे राक्षसानां च सर्वशः।**

**वैदेह्याश्चैव यद्वृत्तं प्राकाशं यदि वा रहः।।**
**तच्चाप्यविदितं सर्वं विदितं ते भविष्यति।**
**न ते वागनृता काव्ये काचिदत्र भविष्यति।।**

ततो वाल्मीकिः ब्राह्मणा आदेशेन सप्तकाण्डात्मकं, पञ्चशतसर्गात्मकं, चतुर्विंशतिसहस्रश्लोकात्मकं रामायणं रचितवान्।

**रामायणशब्दार्थः**

रामायणम्, रामस्य चरितान्वितम्, अयनम् – शास्त्रम् इति मध्यमपदलोपसमासः इति अङ्गीकारः। एष अर्थः शब्दकल्पद्रुमे त्रिकाण्डशेषस्तः इति। शाखमार्तिवादित्वात् मध्यमपदलोपसमासः। रामस्य चरितमित्युक्ते काव्यस्य अग्रहणात् षष्ठीसमासः न विहितः। अतः रामचरितात्मकं शास्त्रात्मकं काव्यं रामायणमिति फलितः अर्थः।

संस्कृतवाङ्मये इतिहासरूपेण विराजेते रामायणमहाभारते। रामायणमहाभारते भारतीयजीवनाधारितग्रन्थावेव। तत्र रामायणम् आदिकाव्यमिति वाल्मीकिः आदिकविरिति प्रथित एव। रामायणे सप्तकाण्डाः, चतुर्विंशसहस्रश्लोकाः विराजन्ते। रामायणे अनेके नैतिकविषयाः समाजहितकराय उल्लिखितास्सन्ति। रामायणे अनेकत्र यागप्रस्तावना दृश्यते। बालकाण्डे दशरथेनन कृत अश्वमेधयागः, पुत्रकामेष्टियागश्च प्रसिद्धावेव।

**सोमयागस्य प्रस्तावना**

वैदिकसमये यागद्वयमुपलभ्यते – एकस्तु दुग्ध – घृत - दधि – पुरोडाशादि आहुतिभिः क्रियमाणो यागः, अपरस्तु सोमरसस्य आहुतिद्वारा क्रियमाणो यागश्च। प्रथमप्रकारस्य हविर्यज्ञ इति द्वितीयप्रकारस्य सोमयज्ञ इति नाम अस्ति। अथर्ववेदे गोपथब्राह्मणे भृगु तथा अङ्गिरमहर्षिश्च सोमयागं कृतवन्ताविति आधाराः सन्ति। हविर्यज्ञ तथा सोमयज्ञश्च अनेकप्रकारकाः भवन्ति। कृष्णयजुर्वेदे प्रथमकाण्डे, षष्ठमप्रपाठके, नवमानुवाके यज्ञस्य नामानि उपलभ्यन्ते – “प्रजापतिर्यज्ञानसृजत। अग्निहोत्रं चाग्निष्टोमश्च पौर्णमासीञ्चोकथञ्चामावास्याश्चातिरात्रम्” इत्यादि। हविर्यज्ञः सप्तविधिं भवति यथा – अग्न्याधेय, अग्निहोत्र, दर्शपौर्णमास, आग्रहायणी, चातुर्मास, पशुबन्ध, सौत्रामणिरिति। सोमयज्ञोऽपि सप्तविधं भवति यथा – अग्निष्टोम, अत्यग्निष्टोम, उक्थ, षोडशी, वाजपेय, अतिरात्र, आप्तोर्यामश्चेति। राजसूयः, अश्वमेधश्चापि सोमयागान्तर्गतावेव। परन्तु ब्राह्मणाः एतौ नैवाचरन्ति। सर्वेषां यज्ञानामुत्पत्तिः अग्निष्टोमादेवेति ज्ञातव्यम्। अतः सोमयागस्यैव विशिष्टं नाम अग्निष्टोम इति ज्ञायते। सोमरसेन साध्यतेति कारणात् जनाः सोमयज्ञमित्याहूयन्ते। सोमयागस्य त्रिप्रकाराः भवन्ति आहीन – सत्र – एकाहेति। एकस्मिन् दिने जायमानो यज्ञः एकाहमिति कथ्यते। दिनद्वयात् द्वादशदिनपर्यन्तं जायमानो यज्ञः आहीन इति कथ्यते। एकपक्षादधिकदिनेषु जायमानो यज्ञः ‘सत्र’ नाम्नाभिधीयते। सत्रस्यापि दीर्घसत्रमित्यनेकप्रकाराः सन्ति।

अग्निष्टोमयागकरणावसरे एवं कथितमस्ति – “वसन्तेऽग्निष्टोमः” इति कात्यायनसूत्रेषु, “वसन्ते ज्योतिष्टोमेन यजेत” इति आपस्तम्बसूत्रेषु उक्तमासीत्। अर्थात् वसन्तकाले एव सोमयागः करणीय इति ज्ञायते। सोमयागस्य प्रधानदेवता अग्निः। अत एव अस्य नाम “अग्निस्तोमः स्तवन इत्यग्निष्टोमः” इति अग्नेः स्तोत्रं, पूजाञ्च करणीयमित्यर्थे प्रयुक्तः आसीत्। तदा अन्यदेवतानामपि पूजा क्रियते।

**सोमयागविधिः**

सोमयागकरणावसरे सुपटुः ब्राह्मणो अपेक्षते। तत्र प्रथमं सुरक्षितं शुद्धं प्रदेशमपेक्षते। तत्र मण्टपस्य निर्माणं, चतुर्षु दिक्षु समानरूपेण, तथा एकैकस्याम् दिशायाम् द्वादशारन्तयश्च भवन्ति। मण्टपमिदं प्राचीनवंश नाम्नाभिधीयते। चत्वारि द्वाराणि भवन्तीति चतुरमण्टप इति कथ्यते। चतुर्षु दिक्षु तृणाच्छादनं च भवति। तत्पश्चात् ऋत्विक्, यजमानी च गृहे दीक्षायां भवन्ति। अस्मिन् यज्ञे षोडश ऋत्विजाः भिन्नभिन्ननामभिः भिन्नभिन्नकार्याणि कुर्वन्ति। तेषां नामानि यथा – ब्रह्मा, उद्गाता, अध्वर्युः, होता, ब्राह्मणशंसी, प्रस्तोता, मैत्रावरुणः, प्रतिप्रस्थाता, पोता, प्रतिहर्ता, अच्छावाकः, नेष्टा, अग्नीध्रः, सुब्रह्मण्यः, प्रावस्तुतः, उन्नेता च। आपस्तम्बप्रकारेण एका सदस्यापि स्यात्। अस्मिन् यज्ञे होता – उद्गाता – अध्वर्युः – ब्रह्म एते प्रधानरूपेण भवन्ति, अन्ये सहायकरूपेण तिष्ठन्ति च।

दीक्षाग्रहणसमये यजमानस्य मुण्डनं, स्थानं, माङ्गल्यद्रव्यधारणञ्च भवति। ऋत्विक् दर्भाञ्जलिं स्वीकृत्य यजमानस्य शरीरे जलं सिञ्चन् वेदमन्त्रैः सह यज्ञमण्टपस्य पूर्वद्वारास्य बहिः गृह्णाति। तत्र दीक्षा दीयते। तत्र एको यागः होमस्य आरम्भसूचकत्वेन प्रारभ्यते। दीक्षाग्रहणानन्तरम् अध्वर्युः उच्चस्वरेण मनुष्याणां देवतानाञ्च श्रवणाय “अदीक्षिष्टोऽयं ब्राह्मणः” इति वदति। यजमानः क्षत्रियो वा ब्राह्मणो वा भवेत् स तस्मिन् समये ब्राह्मण एव। तदा दीक्षितेन यजमानः प्राणेष्टि नामक लघुयागं करणीयम्। अस्मिन् यागे चारुपाकं कृत्वा तेन अदितेः, घृतेन अग्नेः, सोमेन सूर्यदेवतायाः च होमं करणीयम्। तदा प्रति-प्रस्थाता नामक ऋत्विक् उपखप्रदेशे कुशान् स्थापयित्वा तस्योपरि सोमलतां निधाय तिष्ठति। सोमविक्रेता सोमस्य राशिं परीक्ष्य शुद्धिः करणीयः। ऋत्विजैः सह यजमानी आगत्य तं क्रीणाति। तत्र क्रयविक्रयणं भवति। तदा पुनः आतिथ्येष्टि नामक लघुयज्ञमारभते। अर्थात् राजा सोमः गृहे अतिथिरूपेणागतावानितिज्ञेयः। अत एव यथोचितम् अतिथिसत्कारं करणीयमिति पूर्वज्ञैः उक्तमासीत्। सोमयागस्य विघ्नकारिणम् असुरं प्रति यजमानिना त्रिवारं “उपसद” इति लघुयज्ञं करणीयम्। तस्मिन् यज्ञे प्रातः सन्ध्यासमयेषु सोमराजाय विष्णुदेवताय च घृतपूर्णाहुतिः समर्पणीया। “उपसद” नामक यज्ञः दिनत्रयं प्रचलति। दिनत्रयेषु मध्यदिने सौमिकवेदीनिर्माणं भवति। अस्य सम्मुखभागः अंश इति, पश्चाद् भागः श्रोणीति कथ्यते। अस्योत्तरभागे दशाङ्गुलपरिमितम् एका वेदी निर्मीयते। यत्र अग्निहोत्रं प्रज्वलति तस्य नाम उत्तरवेदीति कथ्यते। तस्याः वेद्याः उत्तरभागे पूर्वपश्चिमभागयो एको गर्तः खन्यन्ते। तस्याकारमपि अग्निहोत्रवेदी इव भवति। महावेद्याः मध्ये ओणीरेखां लिखन्ति। मध्यात् अंशपर्यन्तं या सुव्यक्तरेखास्ति तस्याः नाम “पृष्ट्या” इति। महावेद्याः उत्तरांशस्य पश्चिमभागे चतुरङ्गलादूरे एको गर्तः नवाङ्गुलपरिमितो भवति। तस्य नाम चत्वालक इति। चत्वालकात् द्वादशपरिमाणे दूरे एको गर्तः तस्य नाम ‘उत्कर’ इति।

तत्पश्चात् अध्वर्युः तथा प्रतिप्रस्थाता च हविर्धानं तत्र स्थापयित्वा पश्चिमदिशातः महावेदीमानीय श्रोण्याः निकटे स्थापयन्ति। तदनन्तरं पृष्ट्यायाः दक्षिणभागे चतुर्भित्तिपरिमितं मण्टपमेकं निर्मीयते। तस्य मण्टपस्य नाम हविर्धानमण्टपमिति कथ्यते। पूर्वपश्चिमदिशासु द्वारद्वयं, चतुर्षु दिक्षु गुडापानं प्रसार्यते। मण्टपमध्ये अग्निकोणे वर्गाकाररेखां कल्पयित्वा अर्धपरिमितम् गर्तः खन्यते। गर्तस्योपरि वृष - चर्म - शिलापट्टञ्च स्थापयन्ति। तस्योपरि एव सोमः सङ्घर्ष्यते। हविर्धानमण्टपसम्मुखे पृष्ट्या नामक स्थाने दक्षिणभागे अन्यमण्टपं निर्मीयन्ते। तत्पश्चात् अग्निशालायाः निर्माणं सदोमण्टपं, हविर्धानमण्टपस्य उत्तरभागे च निर्मीयन्ते। आहवनीयकुण्डसमीपे एव यज्ञसम्बद्ध यूपस्तम्भं प्रतिष्ठितं भवेत्। ततः अग्निष्टोमीयपशुयागः सोमयागस्य पूर्वाङ्गत्वेन भवति। तस्मिन् समये उत्तरवेद्यां सोमलतामानीय हविर्धानमण्टपे निधाय यज्ञपशुं पवित्रजलेन स्थानं कारयित्वा यूपस्य पुरतः पश्चिमदिशि स्थित्वा कुशाञ्जलीयुक्त प्लक्षशाखया मन्त्रपूपं कारयेत्।

यदा पशुः वध्यस्थाने प्रविशेत् तदा ऋत्विजाः उच्चैः वेदमन्त्रोच्चारणं करिष्यन्ति। “हे व्यापक! इन्द्रसमूह! अस्य पशोः इन्द्रियाधिष्ठात्री! देवीसहितेनागत्य होमद्रव्यं यच्छन्त्विति घोषयन्ति। तदा तं पशुं कर्तयित्वा शामिकनामकाग्निकुण्डे प्रक्षिपेत्। मन्त्रेण सहितमाहुतिः प्रदेया। अस्यैव नाम अग्निष्टोमीयपशुयाग इति। तत्पश्चात् ब्राह्मणः, चत्वालः उत्करभूमेः उत्तरभागे जलाशयात् जलमानीय यज्ञशालायां स्थापयन्ति। तस्मिन् दिने उपवासं कुर्वन् नानाप्रकारकग्रन्थपठनं भवति। तदनन्तरदिनं सूत्यादिवसो भवति। तद्दिने हविर्धानात् सोममानीय उपसवस्थाने स्थापयन्ति। अध्वर्युः प्रेषमन्त्रेण आवाहनं करणीयम्। अश्विनीकुमारस्तवनेन सह उन्नेता सोमपानं सिद्धं कुर्यात्। यजमानेन तस्य पत्न्या आनीतं चमसाध्वर्य्यजलं पूर्वोक्त जले सम्मिश्रणं कृत्वा सोमसमीपमुपविश्य अनुक्षावाक्यमुच्चरन् पञ्चमुष्टीसोमं शिलायाः उपरि स्थापयित्वा संयम्य तस्मात् सोमरसम् उन्नयन्ति। सोमाभिष्वसमाप्त्यनन्तरं पुरोहिताः सोमं सङ्घर्षयित्वा कलशे स्थापयित्वा अनेकप्रकारकमन्त्रैः आहुतिं प्रदीयन्ते।

सोमयागस्य देवताः सूर्यः, अग्निः, इन्द्रः, वायुः, मित्रः, वरुणः, अश्विनीकुमारः, विश्वदेवः, महेन्द्रः, वैश्वानराग्निः, चैत्रमालायुक्ता अधिष्ठात्री देवता, मरुद्गणसहितः इन्द्रः, त्वष्टसहिता अग्निपत्नी इत्येतेभ्यः स्वाहा इति वचनं कथ्यन्ते। तत्पश्चात् पुरोहितः, यजमानश्च सोमरसं पीत्वा कृतकृत्यौ भवन्ति। यज्ञसमाप्त्यनन्तरं सदोमण्डले यजमानः गत्वा

दक्षिणां प्रदास्यति। यज्ञसमाप्त्यनन्तरम् अवभृथस्थानम् अनिवार्यम्। पुरोहित - बन्धु - मित्र - स्त्रीभिस्सह यजमानः नद्यां वा पवित्रजलाशयं वा प्रविश्य होममाचर्य ब्रह्महत्यादोषात् विमुक्ता भविष्यन्ति।

रामायणे शम्बूकवधो नाम प्रसङ्गो दृश्यते। शम्बूकः शूद्रजात्यां जातः। शूद्राणां कृते तपश्चरणं नास्तीति ऋग्वेदे दशममण्डले, त्रिंशत्तमसूक्ते लिखितमस्ति। शम्बुकः व्यसनी च। अक्षसूक्तमपि अयं विलिखितवान्। एकदा सरस्वतीतीरे सोमयागः प्रचलति स्म। तत्रस्थाः ब्राह्मणाः अमुं दास्यपुत्र इति विनिन्द्य बहिः निष्कार्षितवन्तः। सः शम्बूकः किञ्चित् दूरं गत्वा अपां - नपातस्तुतिं चकार। अस्य संयोगादेव सरस्वतीनदीप्रवाहः चतुर्षु पार्श्वेषु आगत इति तत् स्थलम् परिसारकतीर्थमिति नाम्ना प्रसिद्धम् जातम्।

शम्बूकः पौराणिकः शुद्रश्च। अयं दैवत्वं तथा स्वर्गप्राप्त्यै विन्ध्यपर्वतस्य अङ्गभूतं शैवलनामकपर्वते घोरं तपश्चचार। शूद्रधर्मं त्यक्त्वा तपश्चरणमिति कारणात् ब्राह्मणपुत्रस्य मृत्युर्जातः। अतः रामः शम्बूकं हत्वा ब्राह्मणपुत्रं जीवयामासेति कथा रामायणे उत्तरकाण्डे दृश्यते।

रामायणे अनेकयज्ञानां विस्तारवर्णनमस्ति। प्रथमं दशरथेन पुत्रप्राप्त्यै कृतः पुत्रकामेष्टियागः। विश्वामित्रोऽपि स्वयागसंरक्षणाय रामलक्ष्मणौ नीतवानिति ज्ञातपूर्व एव। रावणोऽपि पराजयभ्रान्त्या ब्रह्मास्तयज्ञं समाचरितवान्। पुत्रः मेघनादोऽपि निकुम्भिलायागं कृतवान्।

**एतस्तुरहुत भोक्तारं हुत भुक्सदृशप्रभुः।**
**जुहुवे राक्षसश्रेष्ठो विधिवन्मन्त्रसत्तमैः।।**[1]

राजा चित्रकेतुरपि यज्ञं कृत्वा तत्फलं श्रेष्ठपन्त्यै कृताद्युत्यै दत्तवान्। रामोऽपि अश्वमेधयागमकरोत्। अत्र सोमयागस्य प्रस्तावना शम्बूकस्य उपाख्याने एव ब्राह्मणैः कृतयाग इति उपलभ्यते। अन्यत्र कुत्रापि सोमयागस्य प्रस्तावना नास्त्येव।

**उपसंहारः**

वाल्मीकिरामायणे यज्ञसम्बद्धविशेषाः अनेकत्र दृश्यन्ते। दशरथादारभ्य श्रीरामपर्यन्तं यज्ञं समाचरितवन्त इति रामायणात् विज्ञायते।

**आधारग्रन्थसूची**


1. श्रीमद्रामायणम् – वाल्मीकिमहर्षि - गीताप्रेस् - गोरखपूर।
2. संस्कृतसाहित्येतिहासः – आचार्य हंसराजः अग्रवालः, चौखम्बासुरभारती-प्रकाशन्, वारणासी।
3. संस्कृतवाङ्मयचरितम् – रामचन्द्रमिश्रः, चौखाम्बाविद्याभवन्, वारणासी।


1. श्रीमद्रामायणम् - युद्धकाण्डं - श्लो - 18